संस्कृत वार्ता:

17.10.2026

सायम् : 06:20

<u>मुख्यवार्ता:</u>

· सर्वोच्च-न्यायालय: अन्तर्जालात् बाल-लैंगिक-शोषणस्य तथा दुर्व्यवहारस्य सामग्र्या: निष्कासनाय राष्ट्रिय-तथ्याधारित-निर्माणार्थं केन्द्र सर्वकारम् आदिष्टवान्।

· केन्द्र प्रशासनं मादक द्रव्याणां विक्रयणां दुर्व्यवहारस्य च विरोधे आन्दोलन-रतानां कार्य कर्तॄणां हत्याया: विषये पञ्जाब सर्वकारात् प्रतिवेदनं याचितवान्।

· भारतीय-खाद्य-सुरक्षा-मानक-प्राधिकरणं शिशु-पोषण-नियमेषु संशोधनार्थं शर्करायाः, फ्रुक्टोजस्य च योजनं प्रतिषेधयितुं प्रारूप-संशोधनस्य सूचनां दत्तवान्।

· सुख्यात-चलचित्र-संगीतकार: निर्देशक: च देवाने-सन-चोक्कलिंगम् चेन्नई नगरे दिवंगत:।

· मल्लयुद्धे अमृता-पुजारी संयुक्त-राज्य-अमेरिकाया: लास-वेगास्-नगरे अंडर-13 स्पर्धायां महिलानां द्वि-सप्तति-किलोग्राम-वर्गे रजत पदकं प्राप्तवती।

· पुरुष- क्रिकेट् क्रीडायाम् अद्य सायं बेंगलूरू नगरे भारतस्य वेस्टइण्डीज-दलेन सह पञ्चम: अन्तिम: च टी-20 स्पर्धा भविष्यति।

<u>न्यायालय-बालदुर्व्यवहारः</u>

सर्वोच्च-न्यायालयेन अन्तर्जालात् बाल-लैङ्गिक-शोषण-दुर्व्यवहार-सामग्र्याः अभिज्ञानार्थं निष्कासनार्थं च प्राविधिक-नियामकीय-उपायेषु बलम् प्रदत्तम्।

न्यायमूर्तेः जे.बी. पारडीवाला-महोदयस्य न्यायमूर्ति-के. वी. चन्द्रन्-महोदयस्य च पीठेन सामाजिक-सञ्चार-पटलेषु एतादृश-सामग्र्याः अभिज्ञानार्थं विलोपनार्थं च एकायाः व्यापक-राष्ट्रिय-दत्तनिधेः निर्माणाय निर्देशः प्रदत्तः। शीर्ष-न्यायालयेन चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य स्वकीय-निर्देशानां पश्चादपि अन्तर्जाले एतादृश-सामग्र्याः निरन्तर-प्रसारणे गम्भीरा चिन्ता व्यक्ता। न्यायपीठेन उल्लिखितं यत् केवलं प्राविधिक-सुरक्षा-उपायैः अस्य निवारणं न सम्भवति; अपि तु बालकेषु सुरक्षित-अन्तर्जाल-अभ्यासस्य जागरूकतायाश्च विकासः अपि अत्यावश्यकः। न्यायालयेन संसूचितं यत् अङ्कीय-सुरक्षा आयु-अनुकूला च शिक्षा मुख्य-पाठ्यक्रम-भागरूपेण

योजनीया। केन्द्र-सर्वकाराय इलेक्ट्रॉनिक्स्-सूचना-प्रौद्योगिकी-मन्त्रालयस्य अथ च विधि-न्याय-मन्त्रालयस्य माध्यमेन आवश्यक-मार्गदर्शिकानां , मानक-सञ्चालन-प्रक्रियाणां , अथ च सूचना-प्रौद्योगिकी-नियमेषु संशोधनानां निर्माणाय आदेशः दत्तः। सर्वकारेण आगामि-वादश्रवण-दिनाङ्कात् पूर्वम्, इत्युक्ते दिसम्बरमासस्य दशदिनाङ्कं यावत्, स्व-क्रियान्वयन-प्रगतेः विवरणं प्रतिज्ञापत्रेण समर्पणीयम्।

## पञ्जाब-मादकद्रव्यम्

केन्द्रीय-गृहमन्त्रालयेन पञ्जाब-राज्य-सर्वकाराय पत्राणि प्रेष्य द्वयोः हत्या-प्रकरणयोः एकात्महत्यायाश्च विषये विस्तृत-विवरणं समाहूतम्। एताः घटनाः मादकद्रव्य-सम्बद्ध-आरोपैः सह संलग्नाः सन्ति अथ च राज्ये सम्भाव्य-विधि-व्यवस्थायाः कृते एताः घटनाः चिन्तायुताः वर्तन्ते। प्राप्त-वृत्तान्तानुसारं मन्त्रालयेन अस्मिन् सन्दर्भे राज्य-सर्वकाराय त्रीणि पृथक्-पृथक् पत्राणि लिखितानि।तेषु एकस्मिन् पत्रे मन्त्रालयेन पञ्जाब-राज्ये मादक-पदार्थानां अनियन्त्रित-विक्रयण-दुरुपयोग-विरुद्धम्अभियानं चालयतः एकाभियानकर्तुः हत्यायाः विषये तथ्यात्मक-विवरणं समाहूतम्। गृह-मन्त्रालयेन पञ्जाब-सर्वकारः घटनायाः पूर्ण-विवरणं अथ च प्रकरणे गृहीतानां दण्डात्मक-सुरक्षा-पदक्षेपाणां सूचना प्रदातुं निर्दिष्टः।

## भारतीय-खाद्य सुरक्षा एवं मानक-प्राधिकरणम्

भारतीय-खाद्य सुरक्षा एवं मानक-प्राधिकरणेन एफ.एस.एस.ए.आई. इत्यनेन शिशुपोषण-सम्बद्धनियमेषु संशोधनस्य प्रारूपं प्रकाशितम्। अस्य प्रारूपस्य अनुसारं षण्मासेभ्य: अल्पव्यस्कानां शिशूनां कृते निर्मितेषु खाद्य पदार्थेषु सुक्रोजस्य फ्रुक्टोजस्य च मिश्रणं निषिद्धं भविष्यति। अस्य प्रतिबन्धस्य उद्देश्यं शिशूनां समुचित-पोषणं सुनिश्चितं कर्तुं, तेषां स्वास्थ्य वृद्धि विकासं च प्रोत्साहनं विद्यते।

## एयर-इंडिया

पश्चिम-एशियाक्षेत्रे प्रवर्तमान-परिस्थितिं विभाव्य एयर-इण्डिया अथ च एयर-इण्डिया-एक्स्प्रेस् संस्थाभ्यां जेद्दा, रियाद, दम्माम इति नगरेभ्यः गतिशीलानां सर्वासां विमान-यात्राणां सामयिकं स्थगनम् अस्य मासस्य चतुर्विंशति-दिनाङ्कं यावत् विहितम। विमान-सेवा-संस्थाभिः संसूचितं यत् येषां यात्रिणां पार्श्वे अस्य मासस्य पञ्चदश-दिनाङ्के वा ततः पूर्वं निर्गतानि पुष्टीकृत-आरक्षण-

पत्रकाणि सन्ति, येषां च यात्रा-तिथयः नवम-दिनाङ्कात् पञ्चविंशति-दिनाङ्कं यावत् आसन्, ते सर्वे यात्रिणः आगामि-मासस्य दशम-दिनाङ्कं यावत् एकवारं निःशुल्क-दिनाङ्क-परिवर्तनस्य लाभं प्राप्तुम् अर्हाः सन्ति।

संस्थाभिः अग्रे स्पष्टीकृतं यत् ये यात्रिणः मूल-निर्धारिते मार्गे अग्रिम-दिनाङ्काय पुनः-आरक्षणं कर्तुम् अनिच्छुकाः सन्ति, ते उपलब्धताम् आधारीकृत्य खाड़ी-सहयोग-परिषदः क्षेत्रे तयोः संस्थयोः कार्यरतेभ्यः अन्येभ्यः वैकल्पिक-विमानपत्तन-केन्द्रेभ्यः अपि यात्रा-आरक्षणं चेतुं शक्नुवन्ति। विमान-सञ्चालकेन इदम् अपि निवेदितं यत् निरस्त-विमान-सेवाभिः प्रभाविताः यात्रिणः यदि यात्रां कर्तुं नेच्छन्ति, तर्हि ते पूर्ण-धन-प्रत्यावर्तनस्य विकल्पम् अपि ग्रहीतुं शक्नुवन्ति।

## वायु प्रदूषणम्

पर्यावरण-वन-जलवायु-परिवर्तन-मंत्री भूपेन्द्र यादव- अद्य नवोद्यमै: तथा नवाचार-अभिकरणै: सह दिल्ली नगरे उपवेशनम् अकरोत्। एता: संस्था: वायुप्रदूषणस्य न्यूनी करणाय कार्यं कुर्वन्ति। उपवेशनेऽस्मिन् दिल्ली नगरे तथा समीपस्थेषु राष्ट्रिय राजधानी-क्षेत्रेषु वायुप्रदूषणस्य समस्याया: समाधानाय व्यवहारिक: निस्तारणोपाया: प्रविधि-आधारितोपाया: चर्चिता:।

## निधनम्

प्रसिद्ध: चलचित्र-संगीतकार:, निर्देशक: च देवनसन-चोक्कलिङ्गलम् असौ देव: इति नाम्ना प्रसिद्ध:। अद्य चेन्नई नगरे दिवंगत:। असौ पञ्चसप्तति: वर्षीय: आसीत्। स: तमिल-चलचित्र जगति प्रमुखेषु संगीतकारेषु अन्यतम: आसीत्।

## एल. के. आडवाणी

वरिष्ठ: भाजपा नेता एल्.के.आडवाणी वक्ष:स्थलस्य संक्रमण-कारणात् अपोलो चिकित्सालये प्रविष्ट:। चिकित्सालयीये वक्तव्ये ज्ञातं यत् असौ सम्प्रति गहन-चिकित्साकक्षे उपचाराधीनो वर्तते।

## भक्तानां मृत्युः

अद्य प्रातः राजस्थानस्य कोटा-जनपदे दिल्ली-मुम्मई-द्रुतमार्गे एकं टेम्पो-ट्रैवलर-यानम् वर्षा जलनिकासे पतितः। अस्यां दुर्घटनायां अष्टौ जनाः मृताः, अन्ये पञ्चदश जनाश्च आहताः।

## गुजरात-विस्फोटः

गुजरात-राज्यस्य भरूच-जनपदे रसायन-निर्माण-स्थले एकः शक्तिशाली अभिक्रिया-पात्रस्य विस्फोटः अभवत्। तदनन्तरं विषाक्त-वायोः निर्गमनम् अभवत्। अस्यां दुर्घटनायां पञ्च श्रमिकाः मृताः, अन्ये पञ्च च आहताः जाताः। आहताः श्रमिकाः शीघ्रमेव चिकित्सार्थं समीपस्यं चिकित्सालयं नीताः।

## बांग्लादेश- अग्निदुर्घटना

बांग्लादेशस्य कॉक्स बाजार- जनपदे समुद्रतटस्य समीपे स्थिते एकस्मिन् विश्रामगृहे अग्निदुर्घटना अभवत्। दुर्घटनायां अस्यां दश-जनाः मृताः, येषु एकस्य परिवारस्य षट् सदस्याः आसन्, अनेके जनाश्च व्रणिताः सूच्यन्ते। स्थानीय अधिकारिणां कथनानुसारं उखिया-क्षेत्रे टुपटुप् रेस्टो एण्ड रिसोर्ट इति विश्रामगृहे प्रातः पञ्चविंशति-निमेषोत्तर-सप्तवादने अग्निः प्रज्वलितः। अग्निना त्रि-तलयुक्तं काष्ठनिर्मितं भवनं पूर्णतया दग्धम्। अग्नि दुर्घटनायाः काले तत्र प्रायः त्रिंशज्जनाः उपस्थिता आसन्।

## अमेरिका-प्रतिबन्धः

अमेरिकायाः राष्ट्रपतिना डोनाल्ड-ट्रम्पेन षड्विंशत्यधिक-द्विसहस्रतमस्य रूस-ईरान-प्रतिबन्धाधिनियमस्य अन्तर्गतं विहितानि सीमा-शुल्कानि नैकानि प्रतिबन्ध-प्रावधानानि च विमुक्तानि, येन प्रमुख-क्रेतृ-देशयोः भारत-चीनयोः कृते महती समाश्वासना प्राप्ता। एकस्मिन् आदेशे राष्ट्रपतिना ट्रम्पेन अस्य निर्णयस्य पृष्ठे अमेरिका-देशस्य राष्ट्रीय-हितम् प्रमुख-कारणत्वेन समुल्लिखितम्। एषः निर्णयः अमेरिका-विदेशमन्त्रिणः मार्को-रुबियो इत्यस्य प्रस्तावित-भारत-यात्रायाः पूर्वं सञ्जातः। रुबियो इत्यसौ आगामि-विंशति-दिनाङ्के मुम्बई-नगरे भारतीय-विदेशमन्त्रिणा डा. एस. जयशङ्करेण सह द्विपक्षीय-वार्ताम् करिष्यति अथ च गुजरात-राज्यस्य जामनगर-स्थितं तैल-शोधनागार-परिसरम् अपि द्रक्ष्यति।

## मल्लयुद्धम्

भारतीय अमृता पुजारिणी अण्डर- 13 त्रयोदश विश्व-मल्ल-युद्ध-प्रतियोगितायां महिलानां द्वि-सप्तति किलोमिते भार वर्गे रजत पदकं विजितवती। सा अमेरिका देशस्य लासवेगास नगरे आयोजितायां प्रतियोगितायां अन्तिमस्पर्धायां यक्रेन देशस्य इरिना जब्लोत्स्कायाः विरूद्धं 0-6 अकैः पराजिता। अतः सा द्वितीय-स्थानं प्राप्तवती।

## क्रिकेट्

क्रिकेट् क्रीडायां भारतीय पुरूष-दलं अद्य सायंकाले बेंगलुरू नगरस्य एम्. चिन्नास्वामी-क्रीडांङ्गणे वेस्टइण्डीज दलं विरूद्ध पञ्चमीय-निर्णायकस्पर्धायां क्रीडिष्याति। एषा स्पर्धा भारतीय-समयानुसारं सायं सप्तवादने प्रारप्स्यतें पञ्च-स्पर्धात्मिकायां श्रृंखलायां उभे एव दले 2-2 स्पर्धाः विजितवन्तें।

।। इति वार्ताः ।।